# सुन्दरकाण्ड षोडशः सर्गः (१६) - ॥ सीतानुशोचनम् ॥

प्रशस्य तु प्रशस्तव्यां सीतां तां हरिपुङ्गवः ।
गुणाभिरामं रामं च पुनश् चिन्तापरोऽभवत् ॥ १ ॥

स मुहूर्त मिव ध्यात्वा बाष्पपर्या कुलेक्षणः ।
सीता माश्रित्य तेजस्वी हनुमान् विललाप ह ॥ २ ॥

मान्या गुरु विनीतस्य लक्ष्मणस्य गुरुप्रिया ।
यदि सीताऽपि दुःखार्ता कालो हि दुरतिक्रमः ॥ ३ ॥

रामस्य व्यवसायज्ञा लक्ष्मणस्य च धीमतः ।
नात्यर्थं क्षुभ्यते देवी गङ्गेव जलदागमे ॥ ४ ॥

तुल्य शील वयो वृत्तां तुल्याभि जन लक्षणाम् ।
राघवोऽर्हति वैदेहीं तं चेय मसितेक्षणा ॥ ५ ॥

तां दृष्ट्वा नवहेमाभां लोककान्ता मिव श्रियम् ।
जगाम मनसा रामं वचनं चेदमब्रवीत् ॥ ६ ॥

अस्या हेतोर् विशालाक्ष्या हतो वाली महाबलः ।
रावण प्रतिमो वीर्ये कबन्धश्च निपातितः ॥ ७ ॥

विराधश्च हतः सङ्ख्ये राक्षसो भीम विक्रमः ।
वने रामेण विक्रम्य महेन्द्रेणेव शम्बरः ॥ ८ ॥

चतुर्दश सहस्राणि रक्षसां भीम कर्मणाम् ।
निहतानि जनस्थाने शरै रग्नि शिखोपमैः ॥ ९ ॥

खरश्च निहतः सङ्ख्ये त्रिशिराश्च निपातितः ।
दूषणश्च महातेजा रामेण विदितात्मना ॥ १० ॥

ऐश्वर्यं वानराणां च दुर्लभं वालि पालितम् ।
अस्या निमित्ते सुग्रीवः प्राप्तवाँल् लोक सत्कृतम् ॥ ११ ॥

सागरश्च मया क्रान्तः श्रीमान् नदनदीपतिः ।
अस्या हेतोर् विशालाक्ष्याः पुरी चेयं निरीक्षिता ॥ १२ ।

यदि रामः समुद्रान्तां मेदिनीं परिवर्तयेत् ।
अस्याः कृते जगच्चापि युक्त  मित्येव मे मतिः ॥ १३ ॥

राज्यं वा त्रिषु लोकेषु सीता वा जनकात्मजा ।
त्रैलोक्य राज्यं सकलं सीताया नाप्नुयात् कलाम् ॥ १४ ॥

इयं सा धर्मशीलस्य मैथिलस्य महात्मनः ।
सुता जनक राजस्य सीता भर्तृ दृढव्रता ॥ १५ ॥

उत्थिता मेदिनीं भित्त्वा क्षेत्रे हल मुखक्षते ।
पद्म रेणु निभैः कीर्णा शुभैः केदार पांसुभिः ॥ १६ ॥

विक्रान्तस् यार्यशीलस्य सम्युगेष् वनिवर्तिनः ।
स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो यशस्विनी ॥ १७ ॥

धर्मज्ञस्य कृतज्ञस्य रामस्य विदितात्मनः ।
इयं सा दयिता भार्या राक्षसीवशमागता ॥ १८ ॥

सर्वान्भोगान्परित्यज्य भर्तृस्नेहबलात्कृता ।
अचिन्तयित्वा दुःखानि प्रविष्टा निर्जनं वनम् ॥ १९ ॥

सन्तुष्टा फलमूलेन भर्तृ शुश्रूषणे रता ।
या परां भजते प्रीतिं वनेऽपि भवने यथा ॥ २० ॥

सेयं कनक वर्णाङ्गी नित्यं सुस्मित भाषिणी ।
सहते यातनामेता मनर्थाना मभागिनी ॥ २१ ॥

इमां तु शील सम्पन्नां द्रष्टु मर्हति राघवः ।
रावणेन प्रमथितां प्रपामिव पिपासितः ॥ २२ ॥

अस्या नूनं पुनर् लाभाद् राघवः प्रीतिमेष्यति ।
राजा राज्यात्परिभ्रष्टः पुनः प्राप्येव मेदिनीम् ॥ २३ ॥

काम भोगैः परित्यक्ता हीना बन्धु जनेन च ।
धारयत् यात्मनो देहं तत् समागम काङ्क्षिणी ॥ २४ ॥

नैषा पश्यति राक्षस्यो नेमान् पुष्प फलद्रुमान् ।
एकस् रहृदया नूनं राम मेवानु पश्यति ॥ २५ ॥

भर्ता नाम परं नार्या भूषणं भूषणादपि ।
एषा विरहिता तेन भूषणार्हा न शोभते ॥ २६ ॥

दुष्करं कुरुते रामो हीनो यदनया प्रभुः ।
धारयत् यात्मनो देहं न दुःखे नावसीदति ॥ २७ ॥

इमामसित केशान्तां शतपत्र निभेक्षणाम् ।
सुखार्हां दुःखितां दृष्ट्वा ममापि व्यथितं मनः ॥ २८ ॥

क्षिति क्षमा पुष्कर सन्निभाक्षी
या रक्षिता राघव लक्ष्मणाभ्याम् ।

सा राक्षसीभिर् विकृतेक्षणाभिः
संरक्ष्यते सम्प्रति वृक्षमूले ॥ २९ ॥

हिमहत नलिनीव नष्ट शोभा
व्यसन परम्परयाति पीड्यमाना ।
सहचर रहितेव चक्रवाकी
जनकसुता कृपणां दशां प्रपन्ना ॥ ३० ॥

अस्या हि पुष्पा वनताग्र शाखाः
शोकं दृढं वै जनयन्त् यशोकाः ।
हिमव्यपायेन च मन्दरश्मिः
अभ्युत्थितो नैकसहस्ररश्मिः ॥ ३१ ॥

इत्येव मर्थं कपि रन्ववेक्ष्य
सीतेय मित्येव निविष्ट बुद्धिः ।
संश्रित्य तस्मिन् निषसाद वृक्षे
बली हरीणाम ऋषभस् तरस्वी ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षोडशः सर्गः ॥ १६ ॥